# Brahmadibhih Kritam Narasimha Stotram

# બ્રહ્માદિભિઃ કૃતં નરસિંહસ્તોત્રમ્

## Document Information

Text title : Brahmadibhih Kritam Narasimha Stotram

File name : brahmAdibhiHkRRitaMnarasiMhastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 140/52-64||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# બ્રહ્માદિભિઃ કૃતં નરસિંહસ્તોત્રમ્

નમોઽક્ષરપરરૂપાક્ષરાન્તર્યામિણે ચ તે ।
નમો મુક્તાભિવન્દ્યાય નમો વ્યૂહાત્મને ચ તે ॥ ૫૨॥

નમઃ પ્રકૃતિરૂપાય પ્રધાનપુરુષાય તે ।
મહાકાલસ્વરૂપાય ભૂમરૂપાય ચ તે નમઃ ॥ ૫૩॥

અપ્રતર્ક્યસ્વરૂપાયાઽનન્તરૂપાય તે નમઃ ।
અભક્તનાશકર્ત્રે તે ભક્તરક્ષણકારિણે ॥ ૫૪॥

વરદાનાનુરૂપાય તથૈવ દૈત્યઘાતિને ।
સર્વાત્મને કરાલાય વિકરાલાય તે નમઃ ॥ ૫૫॥

યજ્ઞભાગપ્રદાત્રે તે રક્ષકાય નમો નમઃ ।
હૃદિ બોધાય દેવાનાં ત્રાત્રે તસ્મૈ નમો નમઃ ॥ ૫૬॥

તપોમાર્ગપ્રવૃત્તાય ઋષિગમ્યાય તે નમઃ ।
શ્રાદ્ધતૃપ્તિપ્રદાયાઽત્ર પરત્રદાયિને નમઃ ॥ ૫૭॥

યોગગતિપ્રસારાય સિદ્ધિસ્મૃદ્ધિગૃહાય ચ ।
તપોબલપ્રકૃષ્ટાય ધર્માત્મઁસ્તે નમો નમઃ ॥ ૫૮॥

સ્તુતિસ્તુત્યાય વિદ્યાયાઃ શુભાધિપતયે નમઃ ।
રત્નપ્રદાત્રે ન્યાયાય નીતિધાત્રે નમો નમઃ ॥ ૫૯॥

મનુત્વસંરક્ષકાય પ્રજાપતિત્વદાયિને ।
નટનાટ્યગાયકાનાં ક્રીડાગીત્યાત્મને નમઃ ॥ ૬૦॥

વાહકત્વપ્રદાત્રે તે સપર્યાદિપ્રદાયિને ।
વિષ્ટિકાર્યનિયોક્ત્રે તે જગદીશાય તે નમઃ ॥ ૬૧॥

વૈષ્ણવાનાં રક્ષકાય બહુરૂપધરાય તે ।
નારાયણાય કૃષ્ણાય શ્રીહરયે નમો નમઃ ॥ ૬૨॥

નિત્યં શાન્તસ્વરૂપાયેદાનીં ભયઙ્કરાય તે ।
અવિસ્મૃતસ્વરૂપાયાઽદ્ભુતાય હરયે નમઃ ॥ ૬૩॥

ઇત્યાકાશાત્તુષ્ટુવુસ્તેઽન્તિકં કેઽપિ ન ચાયયુઃ ।
ઉગ્રમૃત્યોર્મુખે ગન્તું શ્રીમૃતે કઃ પતેત્ શ્વસન્ ॥ ૬૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૪૦-અધ્યાયાન્તર્ગતં
બ્રહ્માદિભિઃ કૃતં નરસિંહસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૪૦/૫૨-૬૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 140/52-64..

Proofread by PSA Easwaran

*Brahmadibhih Kritam Narasimha Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*